This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥श्रीशं वंदे॥ देवेंद्रमौलिमंदारमकरंदकणारुणाः॥ विघ्नांधकारं हरंतु हेरंबचरणांबुजरेणवः॥ वंदे वंदारुमंदारमिंदुचूडस्य नंदनं॥ अमंदानंदसंदोह
बंधुरं सिंधुराननं॥ कंठालिंगनमंगलं घनकुचाभोगोपभोगोत्सवं सौभाग्यं जघनावमर्शमहितं मत्प्रेयसीनां पुनः॥ प्राप्तुं कोयमिति प्रियेव यमु
नाकूले बल्लावः स्वयं गोपीनामहरद्दुकूलानि च यः कृष्णः स पुष्णातु नः॥ अपि च॥ चंद्रश्रीतलयत्यलीकनयनं शंभोः सुधाशीकरैर्विर्षंश्च व्याकुलयत्सु
धैर्यमधनानां कांतादृगंतेषु च॥ लीलायै वरमैक्षवं धनुरिषून्विभ्रत्प्रसूनात्मनः स्वच्छंदं रतिवल्लभो विजयते त्रैलोक्यवीरस्मरः॥ नांद्यंते सू
त्रधारः॥ पुरोवलोक्य सप्रमोदं॥ अये खलु फुल्लितमामूलचूडमस्मदीयरोतनपुण्यकल्पलताभिः॥ यत इत एव नूतनपुरपरिसरालंकारबधिरगिरिचू
डामणेर्भगवतश्चूडेश्वरस्य वसंतोत्सवदर्शनसमुत्सुकाः सामाजिकाः कल्याणमपि मध्यमध्यासते॥ तदेनाननुसरत्य चिराय परिचितलास्यकला विलो
कनाय सविनयमभ्यर्थये॥ परांतरं गत्वा सप्रश्रयमंजलिं बध्वा॥ भोभोः सकलकलाविदः सभासदः एष भरताचार्यपुत्रः कलाप्रवीणो निजविद्यादर्श
नायत्र भवतामनुग्रहमाकांक्षति॥ आकाशे कर्णं दत्वा॥ किं ब्रूथ॥ साधु भरताचार्यपुत्र साधु॥ वयमपि चारात्कस्यापि सरसकवेः सूक्तिमुक्ताम
णिग्रथितमभिनवं मिश्रभाणमवलोकयितुमुत्कंठितास्तद्यतो ह्यामे वक्रमणिवाण मणिनीमप्यदर्शयतु भवानिति॥ अनुगृहीतोस्मि॥ आत्मग
तं॥ अधुना विरलः खलु मिश्रवाणप्रचारः विरलाश्च तथाविधाः कवयः अयं च गरीयान्खलु सामाजिकानामादेशः॥ तत्कथमिदमशक्यं संघट्टन
मापतति॥ स्मरणमभिनीय॥ अहो मया प्रणयकलहकुपितगृहिणीमनोविनोदनव्यासक्तचित्तेन विस्मृतमपि सामाजिकानुग्रहेण पुनरन
ति चिराभ्यस्तमेतद्दशमेव रूपकं स्मर्यते॥ भवतु भावद्गृहिणीमेवाहूय कथयामि॥ प्रकाशं॥ आर्ये इतस्तावत्॥ प्रविश्य नटी॥ एनं मि मो णिपो जी
जीवो अणवेदु अंजो॥ एषास्मि को नियोगः आज्ञापयत्वार्यः॥ सूत्रधारः॥ आर्ये॥ कौंडिन्यवंशरत्नस्य कवेः काशीपतेः कृतिः॥ मुकुंदानंदनामायं मि
श्रभाणः प्रयुज्यते॥ तदत्रेत्थं यथोचितं॥ नटी॥ अंजअं चर्यं अंचर्यं॥ जं केके कशावंकोत्ति निंठरात्तं सभावयि॥ जा दाणि दुत्त संदंचेकेवं मि मि पुणा कहं॥ ध्या॥ आ
र्ये आश्चर्यमाश्चर्यं॥ यत्केकर्कशवक्रोक्तिनिष्ठुरात्तस्यभारती॥ जाता मृदुलसंदर्भा व्यास्मिन्मृदुला कथं॥ स्मि॥ सपरिहासं॥ त्वमेव तावत्कथय॥ क्ष
णं प्रणयकोपेस्वं कर्कशापि कथं पुनः॥ प्रेमार्द्रहृदया जाता मंदुलप्रकृतिः प्रिये॥ नटी॥ एं काषिभार इकहं कं न सामि पुद चिच्छिदेदिं मति कयादिउं

Acc. No.- ~~7079~~ M897

Title - मुकुन्दानन्दभाण (खण्डित संकीर्ण)

Date- 1935 संवत्

पत्रे - 29
(Folios)

Author - काशिपती

KKSU LIBRARY
RAMTEK
441 106
M-897
Dist Nagpur

Checked 2012

जो॥धा०॥ एकापि भारती कथं कर्कशा मृदुला चेति एषैव किमन्यस्तु कथयाऽऽर्य॥ सूत्र०॥ कोऽत्र विरोधः॥ उक्तं च तेनैव कविना॥ तर्कै कर्कशवक्रवाक्यगहने यापि स्फुरा भा
रती सा काव्ये मधुरोक्तिसारसुभगा स्यादेव मे कोमला॥ याप्रायः प्रियविप्रयुक्तघनिताहृत्कर्तने कर्तरी प्रेयोऽलालितवच्यते न मृदुला सा किं प्रसूनावलिः॥ नटी॥ कुसु
मसिरीवि अ मिउला सेकइणो भारई॥ धा०॥ कुसुमश्रीरिव मृदुलास्य कवेर्भारती॥ सू०॥ किमुच्यते कुसुमश्रीरिवेति॥ व्याकोचप्रसवश्रियोऽपि मृदुला वाचामियं श्री
या मंदस्यंदिमरंदतोऽपि मधुरस्तत्रायमधःक्रमः॥ सौरभ्यादपि संगतं पुनरिह व्यंग्यं पिकेभ्योऽप्यमी मद्दुर्गिरा मधुरस्वराः कविरयं श्लाघ्यो वसंतादपि॥ सर्वतो
विलोक्य॥ नटी॥ अंज एदं च हरिवणिकरूदिवसंतं अमणि॥ इद्धो वेंरव॥ किं सख्य अकरसि पुतेण वंशकिरायिपुरो कुसुमंजलिनडी दि॥ पवण निहत्त ताळपंत
तालं झणिमणुगा इवि भरावलिय॥ धा०॥ आर्य इदं चूतवनं कथयति वसंतागमनं॥ इतः पश्य २॥ किसलयकरसंपुटेन वल्ली किरति पुरो कुसुमांजलिन पंती
पवननिहततालपत्रतालध्वनिमनुगायति बंभरावलीयं॥ सूत्र०॥ आर्ये साधु निरूपितं॥ इतोऽपि॥ मंदानिलेरितमनोहरपल्लवाग्रे माकंदली कदि
[illegible] य माह्वयती वरागात्॥ प्रस्तुतरं परभृतोऽपि दिशान्विवास्ये कूजन्कुहूरिति समेति न पक्षपातं॥ इतोऽपि पुनः॥ श्रेणी भ्रमयमदालसा मधुकरा पुष्पां
ति वेणीश्रियं प्रांचद्गुच्छभरोऽप्युरोजकलशप्रागल्भ्यमालंबते॥ रागी ह्लासितपल्लवः कलयते रम्याधरप्रक्रियां वासंती लतिकापि तेन वहते वामा
लिका विभ्रमं॥ विमृश्य॥ आर्ये सर्वमपि सुघटितमस्मदीयाभाग्यवशात्॥ यतः॥ कांतिः कोमलकोकिलोक्तिमधुरः काव्यसमान्यः कविः काव्यस्या
पि स एव काव्यजनको धाराविनी दैवकः॥ सारज्ञाश्च सभासदः पुनरमी नाट्ये प्रवीणा वयं किं चायं समुदंचितो भगवतश्चूडेश्वरस्योत्सवः॥ तदत्र
संगीतश्रममनुतिष्ठतु भवतीति॥ नटी॥ गायति॥ पंउविदच्चूदलदियं कोयिलतरुणो रमेयि रमणीं जि॥ उंस दो विमहूं ते भ्रमरउकुलकूरणिं साणि
११. ग्गुणि आर्ये पल्लवितचूतलतिकां कोकिलतरुणो रमते रमणीयं॥ उझन्नवि मुहूर्ते करउकुलकृतनिस्वनं श्रुत्वा॥ सूत्र०॥ सशिरःकंपं॥ अहो सं
गीतमाधुर्यं॥ नेपथ्ये॥ प्राप्यप्रबोधमधुना नटतीव नाधो हा वंचितास्मि विधिनेति विनिंद्य दैवं॥ निश्वस्य मत्कुरद्धतं निजमंशुकांतमाद्र
ष्य हंत न लितैव कथं प्रियामे॥ सूत्र०॥ श्रुत्वा नेपथ्यमुखमवलोक्य॥ अयं किल मंजरीवियुक्तस्य मंदारसदनोद्यानगतस्य भुजंगशेखरस्य भगव
तो मुकुंदस्य भूमिकामाहाय दृत एवाभिवर्तते मातुलपुत्रो मे मधुकरः॥ तदावामप्यनंतरकरणीयाय सज्जीभवाव इति॥ निष्क्रांतौ॥ प्रस्तावना॥ ततः प्र
विशति यथानिर्दिष्टो भुजंगशेखरः॥ प्राप्यम— वो मिति पुनः पठति॥ विमृश्य॥ नदानीमेवाहं तस्याः॥ स्फुरद्घनपुलककदंबं स्पृष्टाकुचकलशयुगल
मविलंबं॥ मधु मधुराधरबिंबं मदवस्याः किमिति मंस्तुनाचुंबं॥ पुनः०वि०॥ कथमेनावनीपितल्कालेवकाशः॥ यतः॥ कुंजे कोमलशाद्वले फलमिहन्ना
गर्वितं रानया किं विश्रान्त्वमस्रूसौ च वचनं किं व्याहृतं वा नवा॥ साकूतप्रणयं समामि नयनं व्यापारितं वा नवा तन्व्या हंत तदंतरे विधिवशान्नस्याः

मधुःपक्ति॥ [illegible] १०

गधेयेन मया॥ उत्संगे विनिवेशयामि पुलकक्लिन्या न वा यवक्रांबुजं वक्षोजौ परिरभ्य वा रिजदृशश्चुंबामि बिंबाधरं॥ जन्मं स्याश्च वरो रहः किं म
पि मे विश्लेषयामि च्छलान्नीवीमित्यपरैर्मनोरथशतैर्नीता निशा केवलं॥ अथ वाऽऽकूतमनसा व्यतीतगोचरया चिंतया॥ निश्वस्य॥ अन्ये यो धा
ने पुनरप्येषा॥ आरुह्योरुयुगं प्रसह्य रभसा दुन्नीय नीवीं प्रिया कांचीकिंकिणिकानिनादचलितामंदोच्चलन्मध्यमा॥ किंचित्कूजितकंधरा रतिप
रिश्रांता च दृक्ष्याधराक्रामं मे परिपृश्यसि द्य्यति न किं श्वो वा परश्वोऽपि वा॥ लक्षणमात्रं विचिंत्य॥ अलमनया प्रत्याशा तावत्तया ह्रीर्निर्वाध्या वाहि—
न्या किं त्वेतावदाशासनीयं॥ आनीलकुंतलपरिष्वजमायताक्षमापाटलाधरदलं चितमंदहासं॥ आपीनतुंगकुचमप्रमिताब्जलग्नमंगं पुरःस्फुरतु मे पु
नरंगनायाः॥ स्मृतिमभिनीय॥ इदमपि मे दुर्लभं मंदभाग्यस्य॥ यतः॥ आकाशेऽया॥ प्रत्युःप्रिया— स्मरन्मृत्योरिव सपदि भीषणं वदनं॥ सा त्वं प्रिये कथं
मे यास्यसि भूयोऽपि नयनयोरयनं॥ सास्रं॥ लीलापांगतरंगितं नयुक्तिमप्यालं व्यभ्रूयस्तरामेतावत्कुपितं त्वया यमहं मत्वा सधैर्यस्थितः॥ त
स्मै वाधरकरे त्वया विनिहितो मारस्य निःसंशयं कांते किंतु करोमि वो नुशारणं कावागतिः कथ्यतां॥ पुनस्तस्यैवेत्यादि पठति॥ नेपथ्ये॥ अयमयमु
दयाद्रेर्नाति दूरे विवस्वान यमयमम जांशुः पातकीयातिवास्तं॥ इयमिमनुप्रकंठे त्वद्वियोगास्सहत्वा निवसति तरुणी ते कोकशोकं विमुंच॥ भु
जंगशेखरः॥ स्मृतिमभिनीय॥ सहर्षं॥ नयनयो रास्तमुपमन्य॥ प्रियावियोगविक्लवं गृहदीर्घिकाचक्रवाकं शोकारवमुखरमुखं मंदमंदमाश्वास
यता मंदारेण मंजरीवियुक्तो हमाश्वासित इवास्मि॥ हृदयं प्रति॥ हृदय धैर्यमाकलय॥ इयमुपश्रुतिरवश्यं प्रियासमागमं फलयिष्यतीति विचिंत्य॥ अस्य वाध्यवसित
गमनो माधवो मंजरीधवः॥ कुत्र मेऽयमनादाय गच्छति॥ सविमर्शं॥ उपश्रुत्याप्सुरेवमर्थो प्रियायाः पुनरिहैवास्थानं च सूचितं॥ अतस्सर्वथा प्रियासमागमेन भवित
व्यं॥ पुनः सोऽभ्यासं॥ कथमिदमद्भुतसुरतस्यासंभावनीयमेव मम संभावनागोचरयति॥ उत्ताम्यतो रतिचिरादपि मन्मथाग्नेरप्याव यो र्धपि न मत्र कथं विरा
मत्॥ तन्नांतरे पतिरभ्युसुनरंतरायस्संतायते तदपि हंत मनोहरो मे॥ नियाति किं न पतिरेष कुतोऽपि हेतोर्द्रक्ष्यामि वा किमहमिंदुमुखीं नभूय॥ सगद्गदं॥ हाहंत
किं नु मदनो मम तावदेव मर्माणि कृंतति कृतांत इवाततायि॥ किंचित्स्थैर्यमवलंब्य॥ पंचापि युगपदेवायं मयि॥ अशोकपल्लवोत्पलचूतमल्लिकाशरानमंगो
यदि संदधाति॥ वा॥ तथा विधानेव तत्सम संख्याकान्॥ करास्यनेत्राधरहासमार्गणान्तथा प्रियाया अनु संदधा [illegible] ॥ इति तामेव तामरर [illegible] ग्रांम

नंसागोचरयन् । किं करोमि । प्रिया पुनः चिंतयन्नपि न पारयामि । विरहपारावारे । यतः ॥ मम सा प्रियतमापि । मंदस्मितेन मधुराधरपल्लवेन कुंभो
न्नतस्तनभरेण कृशोदरेण ॥ विजृम्भितांगलितया च विचिंत्यमाना चेतोधिनोति च धुनोति च चंचलाक्षी ॥ किंचिदिव स्मित्वा ॥ अहो दुरशा खलु तामम
दीयस्य हृदयस्य ॥ यदिदं तथापि ॥ तसादांबुरुहनेत्री स्मयुगलं तादृङ्नवस्थलं तन्मध्यं सगभीरनाभिवलयस्तावानुरोजक्रमः ॥ तद्वक्त्रं देतपांगमुधर्व
लनं तेनीलनीलालकाः सा तन्वीति तदंगकेषु हृदयं धावन्न विश्राम्यति ॥ स्पर्शमभिनीय ॥ किमियं प्रभातप्राया रजनीसंवृत्ता ॥ पुरातनपरीमलमकर
मेदुरा मारुता नवांतिमुकुलीभवत्कुमुदगर्भनीनारुह ॥ चरंति नवसौरभाः पुनरमीन मीरांकुराः हसत्कमलिनीवधूमुखसरोजमुक्ता इव ॥ प्रतीचीमवलो
क्य ॥ पाठांतरं ॥ सज्जंभणसरोजनीसरसिजास्यमुक्ता इव ॥ अयमिह ॥ जरठइव मरालो जाठरागे मयूखैः स्खलितिशिशिरभानुः पश्चिमांबोधिपारे
दूर्ध्वमवलोक्य ॥ अत्र पुनः ॥ श्लथगरुत इवामू स्तत्र तत्रांतरिक्षे विरलविरलभासः किंचतारा लुठंति ॥ अपि च ॥ कलंकच्छायाशोगगनांबुराशौ प्रसार्य च
द्रागतपत्रं तु जालं ॥ लग्नोडुमीनानलघुनं निघृक्ष्य श्वं दृप्तवस्थश्वरमाद्धिमेति ॥ किंच ॥ नभोवनं नक्तमसौ विगाह्य नक्षत्रसेनासहितः शशां=
कः ॥ कराग्रलग्नानेकर्नितिचित्रहृत्य पाथान्प्रभाते प्रपलायते द्राक् ॥ अपि च ॥ आलोकैरराति पापिलैरेवरमां विस्तारयन्दिङ्निशां नक्षत्रद्युतिमा प
दूरचिरादाशंक्य सूर्योदयं ॥ पुंजीभूय भयादिवांधतमसं मन्नाद्रिरेभ्यः स्वत्लान्मीलन्नीलसरोरुहोदरकुटीकोणान्तरे लीयते ॥ तदितो निष्कुटवना
दूहिरद्यैव गंतव्यं ॥ इत्युत्थाय भवनप्राकारमुल्लंघ्य ॥ वीथीं प्रविश्य ॥ हर्म्यावलीमालोक्य ॥ व्यामिश्रैकैकबाहु प्रवलितपृथुलैकैः कचाराह्कांकेडरं
छादृष्टाधरोष्ठं दशदिनितनुश्लेषमालिंग्य कांताः ॥ शश्वन्निश्वाससवेगस्फुरितगुरुकुचद्वंद्वसंघृष्टवक्षास्तां तःशेतेरतांते सुरवमिह सुखजीली
लया कामिलोकाः ॥ किंच ॥ काश्चन पुनरिहैव ॥ निश्शंकं व्यपनीतनीविवसनं मंजुक्वणन्मेखलं क्रीडांदोलनुखिन्नमध्यलतिकं किंचिच्चकंप
नं ॥ उद्यत्कुंडलतांडवं च कचिरं विश्रम्य कांताः परिश्रांता वक्षसि कामिनां मुकुलितप्रांताक्षि संशेरते ॥ अन्यच्च ॥ वीरायितेषु मृगशा
वविलोचनानां कंठोदितानि सुचिरं कलकूजितानि ॥ आम्रेडयन्निरथ सौधगतैः कपोतैः शंके गृहीत इति संप्रति शिष्यभावः ॥ पदांतरं
गत्वा ॥ कोयं कमलापीठसदनप्राकारादवतीर्य पर्यायस्खलितचरणस्तरुणाइत एवाभियाति ॥ निपुणं निरूप्य सगतं ॥ कोन्यो वसंत

का इत्ते अस्मान्मित्राही दृशाचरित्रेष्वगल्भः ॥ प्रकाशं ॥ सखे वसंत कचिरादृशीन्न लक्ष्यसि मे लोचने ॥ स आसंगद्गदं ॥ किं ब्रवीषि ॥ वयस्य मंदं मंदं जल्प
ति ॥ सखे कुतस्ते भयं ॥ किं ब्रवीषि ॥ कमलापीठादिति ॥ सखे माभैषीर्माभैषीः ॥ हस्ते गृहीत्वा ॥ तिष्ठतु कमलावराणां शतं सहस्रमयुतं वा ॥
जिष्णुर्वा विष्णुर्वा स्रष्टा वा लिकदृष्टिरष्टमुखो वा ॥ स्प्रष्टुं वा प्रभुर्वा मत्सखमिष्टपिनांतलो द्रष्टुं ॥ कमितिचित्रपदान्यतिक्र
म्य ॥ कथमद्यापि विकंपसे ॥ किं ब्रवीषि ॥ उद्यत्करालकरवालनतडित्करालगमनुद्भ्रांतभीमतरघोणिगतदृष्टिकोणां ॥ उद्दं
दंडधरदुर्धरचंडिमानमुदीक्ष्य तत्कथय हंत न कंपते कः ॥ इति सत्यं तथाविधमेव कमलापतनः ॥ किंतु ॥ दूरप्रवासिनस्त
स्यासंभावितमवलोकनं ॥ अथवा स्वप्नजंभितमेतदिति प्रसरवस्य भवितव्यं ॥ किं ब्रवीषि ॥ वयस्य नायं स्वप्नः इति ॥ कथं
नवतर्हि पुनरागमनं ॥ किं ब्रवीषि ॥ न तावदेतन्मात्रमपि मिथ्यावचः कथ्यते ॥ सत्यं ॥ दूरप्रवासीति ॥ अहमपि तथैवद्
तीव्रचतालंवितविस्रंभलपातपासममसममशारसमरसंभ्रमसंभृतहृदयो यथापूर्वं नैसैर्विन्यासैर्विलासगत्वाविद्रुम
चरारापर्यंकएव शयानो निःशंकं निद्रामनैषं ॥ ततो निशावसाने निःशंकमेव तस्मान्निशांतान्निर्गतः प्रांगणागतं पातु
कमपश्यमिति ॥ वयस्य कष्टं ॥ अथ कथं पुनर्निष्क्रांतोसि ॥ किं ब्रवीषि ॥ समीक्ष्याहं तु करधृतकृपाणाः प्रचरंति नो बहिर्द्वारं
यावत्परितमरुराज्वाल इह तक ॥ अहं दैवात्ततः कथमपि चलं निष्पवनादुद्यनप्राकारं लघु समनिलं प्यागत इतः ॥ विष्णा
पुनरिनजातं न पेस्पेन ॥ किं ब्रवीषि ॥ विशेषतः प्राणारक्षराणां प्रियवयस्यमुपलभ्येति ॥ भवतु तावन्निष्ठुर ॥ को
यं कमलापीठभवनप्राकाराग्रतो कलकलः ॥ सगद्गदं ॥ किं ब्रवीषि ॥ सखेन नूनं कमलापीठेन खर्परपाणिनासा
मल्लारागवस्त्रभाकरत्नबारिणिव्यापादिता नैति कुतो मम मंदः परिजनाक्रंदः ॥ हा प्रियेकलवाणी हा मदर्धस्यके जीविते
हा मल्लारागवस्त्र भोपस्थपदेशे न पापीयसा मया सुनादुर्दशां नीतासि ॥ अथवा किमिमैः रुपालभ्यते किं त्वहमेव तावदुपा

पानि

लब्धव्यः॥ कंठग्रहे यं शशिमुखि मया कुर्वता दोर्लतीभ्यां प्राणत्रातुं प्रणयगरलं नूनमापूरि गात्रे॥ नो चेत्सर्वैर्यदमृतमयं नेत्रयोर्मात्र
मासीत्तन्ने भर्तुं कथमिव भवेत्ता दृशामर्धपात्रं॥ इति॥ वयस्य कलकलमात्रेण कथमेवमधीरहृदयस्सशोकसागरे पतितो नात्म
नः प्राणान्गणयसि॥ किं॰षि॥ सखे किं ममापि प्राणेष्वनभिष्वंगः॥ येनैवं॥ त्रैलोक्याद्भुतजीवरत्नमबलां स्वप्राणगामुपतिः
किं कुर्यात्कुपितोपि तामिति मया दुरत्तर्कवक्रात्मना॥ जात्येनानुपकारिणा जडधियाभूयस्तद्धेन मत्प्राणेनापि निरीक्षिता न
पि पुनः प्राणप्रियारक्षिता॥ इति॥ स्वगतं॥ कथमप्रतीकारः शोकवेगः संवृत्तो वयस्यस्य॥ किमत्र कर्तव्यमस्ति॥ इदं तावत्कथया
मि॥ वयस्य कमलाक्षीठस्य तस्यां प्रवर्तनमनपेक्ष्यैव त्वं कलकलेन किमप्यमंगलमुत्प्रेक्ष्य गदितुमेवमनुभवितुं वा क्लेश
मनुचितं तदेहि कंवाणीरत्तांतं तत्वतो ज्ञास्यावः॥ इति कतिचित्पदानि गत्वा॥ विलोक्य॥ वयस्य कोयं पक्षांतरनिक्षिप्तकृपाणद्वि
तीयोर्थविकुंठितमूर्धा सत्वरमायाति॥ निर्वर्ण्य॥ किं॰षि॥ सखे अयं मदनुचरः कलकंठो मदवलोकनरतोत्कंठो जवादभिपतति॥ यः
किल निशीथे करकवाणीविलासगृहं विशता मया मदीयं कृपाणं प्रणयवाञ्छाकांक्षतो मम मे वरक्षणीया निक्षिप्त इति॥ भन
त्येनमेव प्रचारः॥ अरे कलकंठ इत इतः॥ खड्गमुत्तंसय प्रशाम्य॥ किं॰षि॥ सं मं खु पन्तुदिंददें वंसवअं सेस्सम हसामिणा अणाणि
अ॰दिंणाजीविन्नि विहणिपरिहारेअ अंताणिरं रविदेण॥ इति॥ छा॰॥ सम्यक्खल्वनुष्ठितं देवस्य वयस्येन मम स्वामिना॥ नि
जपाददत्तजीवितमपि निजजनं परिहृत्यात्मानं रक्षतीति॥ स्व॥ कथमयं वयस्यमुपालंभमानः॥ कलवाणीगतं किंचिद
शुभं पिशुनयति॥ प्र॥ अरे मूरख किं दुःखितमेव वयस्यं पुनरेवमरुंतुदवचनैर्दुःखयसि॥ किं॰षि॥ अहं हुस्मि॥ ण केणवि णरं
खिदा सा॥ छाया॥ अनयार्थि॥ न केनापि रक्षिता सा॥ इत्यर्थोक्तौ॥ वयस्य सा — स्वं सगद्गदं॥ किं॰षि॥ आभ्यामाभ्यां कुवलयमयीमा ३

लिकामलकराभ्यां यस्मिन्क्रीडाविधिषु निहितास्सस्परहंसानुरागं॥ सोयं कंठः कनककदलीकंदलीगर्भसारः कांते जातः कथमनिल
तादूरपात्रस्य पात्रं॥ इति॥ स्व॥ कथं वयस्यमाश्वासयामि॥ शोकस्य जैत्रिपरुषं किमितः शुचेति निंदानुशोचनविधिर्बहुशोकहेतुः॥ मो
नं रूपो विधुरत्ता कथमानशोकमाश्वासयेत्सुहृदं सुहृदेन विद्मः॥ प्र॥ वयस्य निःशेषमेर्गतप्रलापिनोप्यस्य वचनमनाकर्ण्य नं२
न्युक्तमेवं विलपेतुं॥ अरे॥ किं॰षि॥ एवं वएंद॥ एसो महल्ली अणिसमंगणसुणेदि॥ एवमेतत्॥ एष मम वचनं समग्रं न श्रु
णोति॥ इति॥ समग्रमेव तावत्कथय॥ किं॰षि॥ सुणायदुज्जावेएंद कहिआदिण केणी विरंखिदा सा॥ यंताणे बुध्धिमदरेण
इति॥ श्रूयतां तावत्कथ्यते न केनापि रक्षिता सा॥ आत्मनो बुध्धिमंतरेण॥ इति॥ वयस्य तव प्रियतमात्मनो बुध्द्या रक्षते स्वकं भव
ति॥ तदमंगलेन शोकेन॥ तत्प्रकारमेव पृच्छावः॥ इति॥ यासां च लेनाश्रुणि प्रमृज्य कलकंठमालोक्य॥ अरे कलकंठ॥ सा किं
विनिष्क्रम्य सौभाग्यतीर्थिकां प्रतिष्ठा॥ यत्र भर्तुः क्षितिभर्तुर्वानिश्चवाति॥ भयं स्वैरिणीनां॥ वयस्य किं॰षि॥ तथा यदिग
णिकासरणिमवतरति मदनकरिणी सा तरुणी तदा सौधे सुधाकिरणमंजिनि लंबमानमुक्तावितानवति मंचतले शयानः २२
आरोप्य वक्षसि ममानिशमायताक्षीमज्ञातरात्रिदिनखेदमहं वसेयं॥ इति कलकंठमालोक्य॥ अरे किं॰षि॥ देवएव तेद
सिंधं मिलअं सिरिमुहहासिअं विअसिणें ताणिलोशणमहरं अधणं नूलो अताए विलोइअसदादिदिणं दिणि दिणि
दिआगणदिकोणु खु कहं विणिसंगणी संदि॥ कुदुताणत्त हुणं रविदं॥ छाया॥ देवएवमेतत्॥ धम्मिल्लकं श्रीमुखं हसि
तं विकासनेत्राणि शोणमधुरं वचनोत्तनोच॥ तस्याविलोक्य सदापि दिनं दिनमिति जानाति कोन्य खलुक

थमपित्रिशांनिशेत्ति॥ किंतु तथा तयानस्तमिति॥ तहिं नदाक्किं सत्तं कखु वा एय॥ किं॰ षि॥ देवं जा वयिमो घराहो णिंगमयं तुबपादिघ
दुवलण पहणेनवुल्लिदो दावएं वसा चदुरा अंतणो आहरणाइ कहिं वि णिंखिविअ णिअवंरवत्ताडएण पुंमैं वे णमो अघोरेमह आहरणीइ
दहहरिअण घहहाह दिमिहा अण्णहिं मिस अंव दूरदेसादो ओअदे अंयउत्ते की करिस्सं की कहइस्सि को गणं को णुसरणं दिअदिमें
तओ कदइदिअंसुधाराकिलिणतो अणसअणी होणिंगदा॥ देवयावदयं गृहान्निर्गत्य त्वरितं गहावनपथेन चलितस्तावद्देव
तावचतुरा आत्मनः आभरणानि कुत्रापि निक्षिप्य निजवक्षिसाधनपूर्वकं अयमयं चोरो ममाभरणानि हृत्वा गच्छति॥ हाहता
स्मी हा नाथास्मि श्वशुरदूरदेशादागते आर्य्यपुत्रे किं करिष्यामि किं कथयिष्यामि का गतिः को नु शरणं इत्युक्तिमात्रमाक्रंदत्य
श्रुधाराश्लिष्यलोचना सदनान्निर्गता॥ इति॥ सबहुमानं॥ साधु वल्लवा णीसाधु साधु वयस्य अन्याहशमेव खलु पतिभ्रता
रणे चातुर्यमस्यास्तव प्रियायाः॥ कस्तत्कंठं प्रति॥ ततः किं॰ षि॥ अहं सो विक्कमलाविघोसं पचोरचरिदयेव मं णितोअ
इहिं॥ अअवंशहमाहाहेमहोगिहि घरआ पिलाएसो देरं चिदा संगिहि को कवलालीटो तिफणिअएं दधुरखणिकिवाण
भारिणं पएठो॥ अहाविदा वएं वसुणधणकुभंठिहो तदुणिं गमिय देवं वहुअनं णित्ति अअहोमि॥ ध्रुवं॥ ततः सोपि कम
लालीटः सर्वं चोरचरितमेव मन्यमानः अयि हृदय वत्सु भेमा भव माभव भयाकुला एष ते रक्षिता सन्निहितः कमला
लीटइति॥ भणित्वा स्वदेवगृहवनं कृपाणपाणिः प्रविष्टः॥ अहमपि तावद्देवशून्यधान्यकुंभस्थितो लघु निर्गम्य देव
पादसन्निधिमागतोस्मि॥ इति॥ वयस्य तच्चपुरातनचेनपुण्यविभवेन निपद्यमिमाम ~~[illegible]~~ संतवतीनां निर्वर्तवती॥ ४

किंब्रवीषि॥ तस्या एवं वै पुण्यविभवे सत्ति वक्तव्यमिति॥ भवतु तथैवमदाभिरनषितं भवतः॥ पदांतरं गत्वा॥ अंगुल्यां निदि
श्य॥ का सा॥ येयं विभ्राणा दृशि थितां करेणा नीवीं निश्वासस्फुरितकुचामुहुस्पर्शंति॥ पश्यंती चलितमितस्ततो मृगाक्षीय
यमिस्खलित्तपदं प्रयाति तूर्णं॥ किंब्रवीषि किंन जानासि रत्नगुप्तस्नुषेति नहि जानामि॥ इयाम॥ कायेस
सपिजानुयानितन बहिर्नाप्यन्यमालोकते साध्वी कप्युनती स्तनी गुरुजनं श्वश्रूश्च शुश्रूषते॥ विस्रंभंकुरु
तेच पखुरधिकंजाते निशीथे पुनर्निद्राणे निखिले जने शशिमुखी निर्याति रुत्कंठिते॥ किंब्रवीषि॥ एषैव
योषिता धन्याशीलं च लभते सुखं॥ दिवा पतिव्रता भूत्वा नक्तं च कुलटायते॥ वयस्य स्वस्म्य गुप्तं॥ परिक्रम्यावि
लोक्य॥ वयस्य पश्य पश्य॥ इयमिह॥ अंगुष्ठतर्जनीभ्यामधरं धृत्वा विलोकयत्यबला॥ कुचयुगमुधतनिच्चयाप
श्यति भावयति पश्य मशस्पपिच्च॥ किं॰ षि॥ सखे इतः पश्य॥ एकं विश्लथकेशपाशहनने व्यापारयंत्याकरं
स्यासोत्कंठिकुचस्थलीपरिगलच्चेलांचले चापरं॥ अस्यास्त्रांसि नितंबरत्नरशनालग्नेश्चावैरंशुके मंदं मंदमि
हा विस्मिशयानं दायनाभीसरः॥ इत्यन्यान्निर्दिश्य॥ संलग्नेस्मरमांगके त्रिचतुरैः शय्याप्रसूनैरियं शंकेरंध्र
गवेषिरागा निजश्वसे विधेतिपंचेषुरागी॥ मन्ये छत्रोचनशोराकोशाचपद्मप्रतिनिभतारं मुखे सीत्कारस्फुरिता
भरंच सुतनोरस्याः पदानाम्यती॥ क्षणमात्रं विचिंत्य॥ किं॰ षि॥ सखे किंचित्पृच्छामि॥ पृदिससमेन कथयसि
नवंचयसि॥ इतिचयस्याक्लिनिक्करापि किं शब्दितः पूर्वमसमंयतेन धुतायसत्यनवचनेन बंचयामि॥ किं॰ षि॥ कार्यं

इधातिगात्रंगमयतिनिद्रा॥लयं चनेत्रांतः॥विरहदहनातिरिक्तंविकरोतिनिश्वसितमारुतोपिनव॥किमत्रकारणमितिस्वगतं॥
कथंकुमारावाहिस्थोपि अहमनेनाविदितोस्मि॥प्रकाशं अस्तिकारणं॥कारणमेवमिव॥किं॰षि॥तत्पैवपुरोहितपुत्रंवी
तिहोत्रंमाश्रयस्वेति॥किमत्राश्रयणीयमस्ति॥समेवाल्यामित्रः पुरोहितपुत्रः॥किं॰षि॥सएवभवतोविदितवृत्तां
तःकृतांतिकशिरोमणिस्वयंकेचिद्वेदनरायंपिशुनयस्तस्याः पतिगृहगमनंनिवारयिष्यतीति॥वयस्यसाधुमंत्रितंस
पुनरद्यपुरोहितपुत्रः॥सविमर्शं॥किं॰षि॥तेनातिपत्नमद्येवदेवतार्चनायपुष्पाणपवचिन्वतापुरोहितपुत्रेणपुरोद्या
नेस्थातव्यमिति॥कलकंठ॥किं॰षि॥चेटिययंचरणीयेतिभणितादेवदूति॥धा॰ चेटिकार्चनायेतिभणितव्यं॥इति॥अरे
मूर्खनैपूजार्हेपियात्किंचिन्नजानासि॥किं॰षि॥कहंपुराणपारिहोस्वा॥सदिहोमबलिकंमसुमिद्धस्विणांनिदृदिणीदुगहं
दि॥निफणीकइयमनन्तसज्जाचेडिआराणीचछणीइवदइ॥धा॰ कथंपूजार्हःसः शांतिहोमकर्मसुयद्दक्षिणोतिद्रवि
णागृहते॥नत्वरणीकृत्यमत्तकेनयश्रोतिकानांचरणोवंदनेइति॥वयस्यत्वमपिकिंब्रवीषि॥सखेएवमेवनेतत्॥
विस्फूर्जतिमिरेकुटीरकुहरेगउमीतिसोन्मीलितैरायासेनपुरःपुरोहितसुतैस्तावञ्जिशानीयते॥सायंस्वीकृतदक्षिणा
वसुपणोत्थावन्निजस्वामिनीप्रस्वापावधिकोपचारनिरतोनान्येतिदासीजनः॥इतिसोपहासं॥वयस्यनजानासि॥
गणिकानिशांत — चेटिकापिहाः॥कृतिचित्सपरस्वेनरयंतुमेसरया॥सफलीकरोतिपदयोषिदुन्नतस्तनकुंभिकुंभपरिरंभ
णैरूरः॥तदिह उद्यानवनंगत्वापुरोहितपुत्रमन्वेषयामि॥कुपुनरितोगच्छतिवयस्यः॥किं॰षि॥वेशनारीमिति ५

संतुशुभास्तेपंथानः॥कतिचित्पदान्यतिक्रम्य॥पंखलुविस्त्रंस्वलमदावष्टंभविष्टंभमाणमदनधनुष्टंकारशंकावन्मधुपसंका
रमुखरशिखरालिनिनरसालकिसलयास्वादसुहितपरभृतकुलकुहुतकोलाहलामंदमंदस्पंदमानमकरंदस्यंदमानविंदु
संदोहपरिपूरितकुसुमपरागपरंपरापरिकल्पितालवालरेखाविभातिवनरेखा॥वनंप्रवेशयित्वाविलोक्य॥अत्र
हिपरागपालीघनसेकतासुमंदंमिलिंदामधुपायिनिष्व॥क्रीडंतिमंदानिलकरणीधारसंचार्यमाणप्रसवक्षवासु॥अन्य
तोवलोक्य॥प्रभातमिहेववविहरंतिजारिणपाः॥नपाहि॥सनान्यंगजकेलिभग्नवल्लयान्येषापरिष्कारभूरतल्पछत्रवन्
स्यमेषाचिकुरस्वस्तप्रसूनोच्चयाः॥एषाविस्मृतहारयष्टिरिदमालिंसंनदालिकैरेभाःकामुकलोकपादकमलन्यासे
कधन्याभुवः॥पदांतरंगत्वाकथमिपमपानपालिकामरालिका॥सविस्मयालिकेलिमत्रकुसुमाचयायमागतो
वयस्मिमेवाविहोत्रः॥किं॰षि॥अहमिदानींएवकुसुमपुटिठोहंथोदंखिणादोरु॥नारीपरणंठो॥धा॰॥अथकी॥
इदानीमेवकुसुमपुटिकाहस्तोदक्षिणतोवृक्षवाटींप्रविष्टः॥इतिनमेनपंथानंदर्शय॥किं॰षि॥इदोइदो॥इत
इतः॥पदांतरंगत्वा॥सविपश्यन्॥यथायथायंमकरंदपूरैरापूरयस्याम्रतरुःप्रकाशं॥तथातथामंदमतुल्यरागोरुदंचय
त्युन्नतमालवालं॥निर्दिश्य॥कुसुमरसबिंदुपूरैर्भरणीभारधीरइंकारो॥मेगुलरसालपुंजेसरसाविहरंतिसिरसमि
हकुंजे॥किं॰षि॥लिजाणामि॥छाया॥ननुजानामि इति॥इहकुंजे इतिसमंतकृतप्राहसंपटति॥पुरन्यतो न
विलोक्य॥सविषादमिव॥अस्मिन्निपतितोष्णबाष्पसलिलम्लानांकुरेकेवलंकूपापहनुवविप्रलंधसद

शः संकेतकुंजोदरे ॥ क्व दर्यासि निरंजना न यदितरत्स्यानामिषश्रोच्चयश्रेणीवेयमशोकपल्लवमयी शय्यादरी दृश्यते ॥ किं·षि ॥ इ
दो वेंखरा इमे देवयंसो ॥ छाया ॥ इतः पश्य रा ॥ अयंते वयस्यः ॥ इति दृष्ट्वा सहर्षं ॥ अत्र कथमगत एव वयस्यः ॥ आउं बिपुष्प
पुरिकेनकरेरा शारवा मासध्यतक्षारा समुच्चलिता लिजालां ॥ उद्यंम्यदाक्षिरा करा समुदीत्समारा: पुष्पाण्यसावपचिनोति
शुरपिकस्य ॥ उपसत्य ॥ वयस्य सुधीन्वेसु संभ्रममुत्सृज्य ॥ क्षणमवलोक्य ॥ वि·षि ॥ सखे संप्रति दुर्विलासानंतना
भिज्ञानं ॥ यतः ॥ कामंदसौरैरवयवैरतिपां[illegible]रेणगंडस्थलेन राभ्रुशालसया दृशा च ॥ बिंबाधरेण च मुहुर्मे स्टणी
स्तेन मन्ये भवंत मधुना भवदन्यमेव ॥ विंचाश्वास्यते ॥ आरक्तमधर्धवरिप्य नयाश्रुपूरं पक्ष्मावपातभरदुष्प्रसराव
लोकं ॥ सततत्त्ववाक्षियुगलं विदरोतिकांतां विश्लेषजं किमपि दुःखमसह्यवेगं ॥ तत्किं प्रस्थिता मंजरी पतिभवनमि
ति ॥ स्वगतं ॥ कथमयं जानात्येव प्रथममकथितमपि वो होस्यं ॥ अथवा दैवज्ञानां किमविज्ञातमस्ति ॥ प्रकाशं ॥
अपि नाम परपसिज्योतिःशास्त्रेराचक्षुषा मे चरितं ॥ यत्त्वं वेत्सि परः किंचिद् कामु [redacted] त्वान्जहावृत्तं ॥ यानिष्कूटि
यन्ने तन्वी मयां तां समयोजयत ॥ विहस्य किं ब्रवीषि ॥ किमेतत्परिज्ञातार्थमपि ज्योतिःशास्त्रं वापेक्षितं ॥ पतत् ॥ क्रीडा
परस्त्रीषु क्रियद्भिरेवादिनिर्गूढापि निरूढिमेति ॥ पंके निखातापि गभीरतोयपाथोजनः किं न्वसमुज्जिहीते ॥ इति
यद्येवं बाधवा न परिहरंति न परिवदंति च पजनमुखं ॥ किं·षि ॥ मैवं वादि ॥ सुचरितमीदृशा[illegible]मखिलं सवैज्ञानं जिस
वैषां न तु परिवद[illegible]ति निपुणापि स्फुरतरमेते परत्रासान् ॥ नत्वकृति पर्यैरेव दिवसैरियं स्वयमेव परिहरिष्यति सकल

मपिवंधुकुलमिति ॥ निश्वस्य ॥ अतः परमविलंबमपि संभावयामि ॥ यदितावदिदानीं शार्दूलवदनबिलादवगलति साहरिणा
क्षि ॥ किं वदसि ॥ सखे न कमेवोत्कंठयसि स्नेहवत्याज हिवत्या ॥ वत्सतथा प्रयतितव्यं ॥ यथा मकरंदरुद्धितामंजरीनवेति
मंदिरकंदरभाजनं भवेत् ॥ तत्प्रथममुपदेशोभगवत्या जहिवस्याससदुपरि प्रियमसुहृदो निदेशाइव भयथाऽवश्यंकर
णीयमेव मे मंजरी गमनप्रसंगभंजनं तव मनोरंजनमिति ॥ स्वगतं ॥ अहो मयि भगवत्या प्रसादातिशयः ॥ यदेव
मप्रार्थितापि न तु युक्ता[illegible]प्यात्मनेव कृतप्रयत्नं मम मे न हितमातनोति ॥ प्रकाशं ॥ दृष्टं कृतानि श्वये त्वं पितावद
स्माकं सहजप्रेमसरसस्वभावचतुरे जने ॥ किमपि तात्मभारारणां व कर्व्यमवशिष्यते ॥ नदीघसत्वरमेवत्वरयाग
तव्यं ॥ किं·षि ॥ अहं गच्छामिति ॥ निरीक्ष्य ॥ कथमाक्रांत एव मित्रेणामेप्रमदवनपर्यंतः ॥ मरालिके किं ब्रवीषि ॥
इतो कमलमिंत्रेणामिंत्रेणायं कृतोपुंवरिपंजीदो ॥ छा· ॥ इतः कमलमित्रेणामित्रेणाआक्रांतः पूर्वगिरिपर्यंतः ॥ इति
प्रतीचीमवलोक्य ॥ घटिमानकोककुचमामसाकैरैविकिरत्वयोजनयनावलोकितः ॥ परिचुंबतीदमरुणप्रभाधरं
रविरद्ध वारवनितामुखं मुहुः ॥ अथवा ॥ भूयो निलीयन्तवरणां बुधिमाप्रभातं पुंजीभवत्युदयते तपनच्छलेन ॥ जाववीनिरंबि
तमयो निधिमघपातुं लीनोडुबुद्बुदकरं बमितिप्रतीमिः ॥ वामतो विलोक्य ॥ उन्निद्रपद्मकोशादुदंच्छंतीशनैरविच्छि
न्ना ॥ इयमियमधुपश्रेणी स्मरकरबद्धश्रियं वहति ॥ किं·षि ॥ तं खुपुंवदिराविंयसिणिसरासिंति ॥ जदो अंगमेइमहुभर
सेणि ॥ छा· ॥ तत्खलुपूर्वदिनविकसितं सरसिजं ॥ यतउद्गच्छति मधुकरश्रेणी ॥ इति यद्येवमयैर्विकासितं दर्शयमे सरसि
जं निर्दिश्य ॥ किं·षि ॥ एदं वेखरअदो ॥ छा· ॥ एतत्पश्य पुरतः ॥ इंदिरावरविहारमंदिरं मंदमंदमरविंदकंदरे ॥ गंधलुब्धिलमरं

सलुंदिले बंभराइह चरंतिसुंदरे ॥ इतिसशिरःकंपंतदेवपठित्वा ॥ सखिकथमपूर्वमेवकथयसिसमसंस्कृतप्राकृत
७ हयंपयं ॥ पाह्लिनीप्रगिंकरप्रहादलिनिकेवलंतोविभुविर्विधस्यानितिलोकवादः ॥ अप्रातरासापनपास्तशंकंभुक्ते
रसंभूरिर्मितिदएव ॥ किंच ॥ जन्मारभ्यप्रतिकृतमसावारजोदर्शनंते भ्राम्यद्दंगधरागरागनयावासरानल्पनै
षीत ॥ वंनूङ्गिन्नारजासिमकृतादृक्षिरागनासिभुक्ता सौख्यव्यंतल्कमालिनिकथंतेनलोकेनवाति ॥ पुनर्विलोक्य ॥
आलिप्तांकुसुमपरागभस्मकामिकापालत्रलमिवकाममाचरंतः ॥ गायंतः किमपिमधूनिभिक्षमाणागाहंते
कमलगृहानराशीभ्गाः ॥ पदांतरंगत्वा ॥ अपिपश्यतावदे■षपौराणीकोमुकुलभद्र इतसएनाभिवर्तते ॥ किं॰षि॰ ॥
जाणिाहिशिगाढपंत्तरि अ जअउसवतह रपठइपुराणीनह रपरवइ अंधावि ॥ ■तहतहवेखड्काकदवोजइ अहरंजतिवा
लविहूया ॥ धा॰ ॥ जानाम्येनंयूढपात्रविकं ॥ अयंखल्वनुतथातथापठतिपुराणंतथातथाव्याख्यस्पर्धानिपि ॥ त
थातथापठ्यतिद्विजवोयथायथायथारज्जंतिबालग्नविधवा ॥ सदंखुराणमुगोदावजमंगलभंदोंति ॥ किंदुचिअबाल
मंडोतिअंबाकिंसएदंसराणम ॥ धा॰ ॥ इदंनखल्वन्मृतंमुकुलभद्र इति ॥ किं॰षि॰ ॥ एवंकोऽलचिद्वरभद्र इतिएतस्यनाम ॥
इतिसत्यं ॥ चिद्वरभद्र इतिमातकृतनाम ॥ गूर्जरास्तुमुकुलभद्र इति आह्वायंति ॥ भवतुभावदेनमान्नपपमि ॥
अपसल्प ॥ एकेहस्तामितंसप्रातेपौराणिकप्रणाम्यसेभुजंगशेखरेण ॥ किं॰षि॰ ॥ सखेसलकल्लरातिकलाकल्लोपदेशि
केत्वापिकामाशिषमाशास्महेति ॥ सविनयं ॥ कथमल्लीकबचोरेवमपिगौरवमारोपयसि ॥ किं॰षि॰ ॥ अपिनाममापि
वचनमल्लीकंसंभावयसि ॥ स्मरसिनावदिदानींत्वमेव ॥ उत्तानेशयनेवलत्तुपहसन्नस्मकर्मो■लोकयन्नात्येपि
७

व्रजसुभ्रुवांतितिकलाकिंरूप्यानोपादिश्यः ॥ याऔलावत्नवेनलाढुपाचितेव्यातेतुरल्कंठयायत्रिंचित्रममुचलकुचकुम्भे
लीकमेणीदृशः ॥ इतिभवतुकस्यवागरहमद्यपविन्नीकर्तुमुद्यतः ॥ किं॰षि॰ ॥ धूर्जस्यनिर्जरदासस्यगृहमिति ॥ स्वगतं ॥
एषनकेदिवंतस्यमंदिरंनविमुंचति ॥ कलावत्यक्षियुगलमतीहरनिगल्यंयतः ॥ प्रकाशं ॥ तस्यगृहिणीमिति वक्त
व्यं ॥ किं॰ ॥ साखलुश्रुतपुण्यचरिताशक्नोति ॥ जगदेवपविन्नीकर्तुमिति ॥ सकौतुकं ॥ कस्याःपुण्यचरितं ॥ किं॰ ॥ म
ध्यंविष्णुपदंकुचौशिवपदंवक्त्रंविधातुःपदंधम्मिल्लस्तुमनःपदंप्रविलसत्कांचीनितंबस्थली ॥ वाणीचेन्मधुरा
धरेरुणाधरश्रीरंगभूमिर्वपुस्तस्याः किंकथयामिपुण्यचरितंमान्यासदानिधरिः ॥ इतिसकुहुमानंतन
एवतत्रभवान्महापते ॥ भवतुतत्रभवतिकीदृशीतस्याः ॥ मनोवृत्तेः ॥ किं॰षि॰ ॥ सखेकिमपूर्वमिव
पृच्छसि ॥ पुरुषोत्तमाधभवतीदेवायेदमितिसमर्पयतिसापंतनीराजनसमर्पयति ॥ शानवधूरीता ॥
इतिसत्यं ॥ अन्यदपिज्ञातासिधर्मोपदेशगुरुरित्यस्मि[illegible]खिलाच्चतापचानीय ॥ वारशतमातनु
तेनतत्र ॥ आभ्यंतरसुरतिदीक्षिकइत्यनंगकृत्वंतरेवकुरुतेगुरुदक्षिणांते ॥ अनादराम्निव ॥ किं॰षि॰ ॥ द्वि
तावतैवमेसांम्राज्यं ॥ कूर्पासनगूढकुचपंकजकुड्मलानांकोनामशंसतुरतिंभुविगुर्जराणां ॥ आज्ञात
चोलमरुवडवचोलनारीपीनस्तनस्तबकमंडलइंतहस्तः ॥ इत्यात्मगतं ॥ सर्वोपिजनःसज्ञातीयमेवप्रियं
मन्यते ॥ येभुविपजानीयालग्ज्ञातीयास्तेतुरज्जंते ॥ शुकपोषितिमिहीह■नोरञ्चयति ॥ कप्रातिरल्पोन्यं ॥

प्रकाशं॥ अपि कस्ते चौलनारीषु पक्षपातः॥ चौलच्छंला पदि कुन्तली दुर्लभा गुर्जरीणां कच्छाभावादलघुजघनं तही
शक्याव मर्शं॥ तद्य स्यस्तद् निउसुदृशामंततः किं तन्तस्यादेकत्रैकं भवति सुलभं तदुदन्यत्र चान्यत्॥ परंतु नक्क
।दिचमपि पातिपार्श्ववर्तिनि सा कथमनुवर्तनीया॥ तत्र भवतो तिलकं मेंवातिमेवेतः॥ कि॰षि॥ पार्श्वि विदे
ततृ यतः कृमिनसमयो गत्वा गृहं मया अभिनानखे॥ स्वपतिशापने पत्नीपार्श्वे व्यहोपरिवित्यसा॥ तमपि
निपुणालिंग्य वाले भुजाल तयैक या च पत्रनपनामा चक्रोडीकरोति लदन्यया॥ इति सा अपि अहो श्रोत्रिय
स्य माहात्म्यं मरालिका प्राति॥ विधत्तासंकेतं विशानुसदनं वा कथमपि क्षमा तस्यां गृहं किमाधिकुरुलां वाम
गदृशी॥ प्रबुद्धेषु सो च्वेदयमपि भवेत्की दृशाद्दशो वराकी सा बालहंकुज बल्लय मग्ना सखिलदा॥ पौराणीक कि॰षि॰
प्रबुद्धे वा तेन नाधि कलव्यों गुर्जरीणां कुन्ताचार क्रमो यं पद्धहे गृहे॥ पौराणिकः पुरो धावा भट्ट्यो वा गृहं वद्दत्र
भः॥ तदलमतिप्रसंगेन साध्यया निद्रानि॥ साधय अहमपि वशवाटिकां गच्छामि॥ मरालिकामालोक्य स॥
खिपुरोहितपुत्रस्य नीतिहो तस्य पादतलं मति चिरेरागताज्जैपि हसि॥ कि॰षि॥ तंस अ ताए तु हादचि॥ आए
उं ततसं मं खुंझोलहि अतुंश अंज एतगीते देलि॥ ध्रा॰॥ तस्य वनस्यालव दपि ता पाश्वंव ता तं समुपगपाले
भ्युत वार्यैनिवेदृणमिति साधु साधु रखि गंतव्यमिति परिक्रम्य॥ विलोक्य ऐ षाधिकं लयोषाकुल भाषाति
तरोषावलक्की रो[illegible]त कारयित माणि मंजुलरुचि पिंजर नवपुरवर मालायित लीलायुत प्रतिसदन प्रतीहार पारा
वत वाराश्रित विपिंकाधारापंजशंतसंदानिभ कंकराली कुंकुमरसपंक्ति लसदानां कराल्लं केवलरूपमारणाक्षवि

तया प्रधुश्रेणीभावबंधलनमपि रुंधे वरलायोः॥ करालंबं दातुं तदपि वततनासी इति सखी कथं कल्याणीयं मदभिमुखमु
त्तिष्ठतिहती॥ मयूरकः किं॰षि॥ कथमियं वयस्य मालोक्य चिरपरिचय समुचित प्रणये वसविनयमुत्तिष्ठतीति॥ अथ किं॥ इ
यमनंगराजामात्यस्य कल्याणनिधेः कलत्रं चंद्रिका नाम॥ किं॰षि॥ केनपुनरियमनवद्यां गणिका सरणी मवतारिता इति॥
ननु भगवता भायजेनैव॥ किं॰षि॥ युक्तमहं वयस्यः॥ विसदृश घटना कुटिलं पंकजयोनिं चिराय परिभूय॥ कृहणशाली
कामः कांतानां कांतमनुगुणं कुरुते॥ भवतु वयस्येन गणिका सती परिगृहीता किं वा कुलांगना सत्येवेति॥ सा वरस्यां॥ किं गणि
काजनं गणयति साधारण भुजंग इव तव प्रियसखो भुजंगशेखरः॥ किं॰षि॰ एवमेतत्॥ रूपगोपाधिक प्रेमनटनं प
ण्ययोषितां॥ पल्लवेषु परस्त्रीणां कचनैसर्गिकी रसः॥ शीलं नाद्रियते कुलं न मनुते नैवानुरुंधे गुरून् नारीणां कुलदेवता
किल रूपतिस्तं चाप्यहो मुंचति॥ किंभूमः परयोषितः पुनरसावन्योन्यरागक्रमः स्वप्राणान पिजानुचिन्तगणस्येषा वि
हीथैयतः॥ इति वयस्य॥ पणाशयेव परिभूयते गणिकाजनगौरवं॥ न चैदेवं॥ ततः॥ आशंकित नरवक्षतं पुनरलज्जमु
क्लांबरं भवनकरणक्रमं प्रचुरचुंबनाडंबरं॥ सशब्दकरताडनं सपरिहाससंभूषणं न कस्यसुरतं मनो हरति वारवाम
भ्रुवां॥ उपसृत्य॥ भुजं प्रसार्य॥ अस्यतामास्यतां तावदुपचारेरलं प्रिये॥ क्लासो गुरुकुचाभोगः क्लेशमुत्थानसा
हसं॥ इति॥ हस्ते गृहीत्वा॥ उपवेश्य॥ सखि चिरायरूपमनुरूपसंबंधं किं॰षि॥ भावक्कि मे ताव तासंवंधं विचारयतु
भवानेव॥ नहरिमुमधुपेन वल्लाता पद्मिनी न परिभुज्यते यदि॥ किं कलंकित वसो रसाश्रियः कर्दमादपि कथं वि

दुःस्थितेः॥ इति सखि त्वदेकायत्तचित्तमपि मामन्यासक्तं भावयसि॥ ननु नक्तंदिवमपि॥ यन्नावलत्ति वाङ्कुपाश
वलयं विश्लेषयत्यागतं यत्त्वरें कथितं रहस्यमितरावैधं च हृद्यं पुनः॥ यद्वंध्यस्थल रिंद्रनीलवलयं गाढलयाक्लि
गितं तन्मे तामरसायताक्षि नितरामावर्त्तते चेतसि॥ किं वान्यदपि कथयामि॥ स्मरतु भवती सखी॥ चिरं पश्या
नक्तं मयि कृतमकसत्वापि निगृहे बहिर्व्याख्या दत्वा मुहुर्विनिवर्त्या त्वयि पुनः॥ मया निर्याते नास्मिन्कश्चिन्निर
स्तोतमसि यन्तदा वक्रं पीतं स्फुरति तदिदानीमिव तव॥ मयूरकः॥ किं-षि॥ वयस्य धन्यः खलु भवान्॥ यत ए
वमुहीर्यं तिष्ठत्यवतस्थुजाः॥ पतिं मुक्त्वा निद्राशिथिलभुजबंधं चलितया कवाटं निःशब्दं लघु विवृतवत्या मृ
गदृशा॥ कश्चित्कोऽयं सीनो घनतमसि सांकेतिकगिरा समाकृतः स्वैरं विहरति तया कोपि सुकृती॥ संव्रीडवैल
क्ष्यं किं-षि॥ अत एव भवता लघुतामानीतास्म इति॥ स्वगतं॥ कथमियमुपालंभगर्भवचस्संदर्भेण मामा
तिक्षिपति॥ तदेनामन्यतो नयामि॥ प्रकाशं॥ कौकौकं नु कक्कीकुलकलितकौतुकस्मेता कांता॥ किं-षि॥ इयं ममै
व मातृष्वस्रेया मल्लिका नाम मत्सुतस्नेहानुबंधाद्भुजनमतिसंधाय मामनुसंगता वर्त्तत इति॥ सानंदं॥
इदमपि ममैव भागधेयं॥ यं करगलितामिव कांचनोर्मिकामिकामेवाविचिन्वता मौक्तिकमालिकेव पुनरियं
मल्लिका मया त्वया समं समासादिता॥ तदधुना यदि न कुप्यसे तदा किंचिद्भणामि॥ एत्थ एत्थेति॥ सानु
रागं॥ उन्मीलत्पुलकं कपोलतलयोरुत्कंपनं भ्रूवो रागोल्लंनयनांतयोर्मयि पिबत्यास्यं प्रवालाधरं॥ ८

व्याधूताकरपाणिकंकणरवव्याघातमस्यावचो मा मा मुंच विमुंच मामिति मनः श्रोतुं समुत्कंठते॥ सस्मितं॥ किं-षि॥ त्वमेव तावदेनामी
प्सितं पथ स्वयमेव साकथयनेति॥ भरतु तावदिदमालापयामि॥ मल्लिकामालोक्य॥ अयि मल्लिके॥ पतत्वपि पयोजाक्षि
पादमूलेन हा सरसत्तु॥ कंनु कः करलग्नोयमिति संताड्यते कथं॥ इति॥ किं-षि॥ पतितमपि पादमूले पश्चात्तु सन्तशीलमवि
लंबं॥ कंनु कमपि कापुरुषं करतललग्नं न ताडयेत्का वा इति॥ अयि किमेतावता परिहीयते॥ तरुणीपदपद्मप्रहारं त
रुणायेपरमं वदंति भाग्यं॥ परिपालतत्करप्रहारः परिभावः॥ किमयं वरोरुते षां॥ मयूरकः॥ किं-षि॥ कथमस्याः कुलक
मगतगणिकाया इव भल्लमगणिकाया अपि न लज्जागरिमा॥ इति सुतनोः॥ किं-षि॥ भावुक जरमारूढ कुटिल
द्वारपथेन क्षिभित्तिगंतव्यं॥ इति सबहुमानं॥ साधु मल्लिके साधु॥ सखे किं-षि॥ नैवं खलु वक्तव्यं॥ कथं वराहमारूढपुरी
षं निषेधयामि॥ मल्लिके॥ किं-षि॥ अरे मयूरक कुलिर्धयूथार्थिनस्तिकुटे मंदुराधिकारः॥ गच्छर॥ किं हा ताबा किम
हा तावात्वमिति॥ सखेयं॥ किं-षि॥ कथमियं गणिकायाजननीवशयतरागिणि कथयति दुरक्षरागीति॥ अपवार्य॥ स
खे विरमर कुटिलांतरंगाः खलु कुटिलास्यः॥ किं-षि॥ कुटिलांतरंगा इति॥ न वक्तव्यं कुटिलतरांतरंगा इति॥ किंच॥
किं भ्रमहेतु कुटिलवीस्त कठोरभावानांगेषु मां तीसु दशांक्रिमुत्तांतरंगे॥ यत्नाव ताद्यमलकेषु दृशोर्द्वितीयमुरोजं भवेत
रितरत्कुचकुंभयोश्च॥ भवतु चंद्रिकामालोक्य सोढव्यमिति॥ चंद्रिके॥ किं-षि॥ मयूरक त्वयि किंचित्प्रथममुदितम
विनीतं मदनुमहत्नयो वनमदपुर्लैलिताया मस्यामपि किंचिदुदंचितं॥ किमेतावता परयें॥ कंनु कक्रीडा चानु

र्यमस्याः पल्लवपालिः ॥ अयि मल्लिके मुधा मा कृथाः कलहं ॥ परिहासकुतुके मयूरके विहर तावत्कंतुकेनेति ॥ सहर्षमा
त्मगतं दिष्ट्या मल्लिका मयूरकौ समीकृतवती चंद्रिका ॥ आकाशे ॥ सखे पश्य २ गुणिनमपि सुवृत्तं ताडितमालोक्य कौ
तुकेन न्याः परिसर्पति कुचभारः ॥ किं च ॥ कर्कशरचनस्य कुत्रकारस्य ॥ वयस्य दीयतामितो दृष्टिः ॥ यत्र शुकमाला
पयन्ति शुकभाषिणीति विलोक्य सकौतुकं ॥ आलापयंत्याः शुकमायताक्ष्याः मूर्ता मुखस्थाक्षरपंक्तिरेव ॥ वि
लोक्यते स्या विमले कपोले तारंकमुक्तामणिबिंबदंभात् ॥ अननमभिनीय ॥ कोऽयं कलकलः पौराणां किं च ॥ वय
स्यागत्वा निरूपयावइति सावधानं तिष्ठ ॥ कतिचित्पदानि गत्वा पुरो विलोक्य सखे पश्य २ अयमिह ॥ पौराना कुलय
सलंतन इतः पश्यन्नतस्यापणे व्याणापणिकान्विचस्य वदनं विभासयन् गर्जति ॥ पाणिभ्यां युगपन्मुखेन
चमुदुर्गंधहाति मुद्रास्यवानुधावन्सुप्लवति प्लवसपिकविभासादमारोहति ॥ सहासं किं च ॥ प्रतिक्षणं विलक्ष
णं खलु प्लवंगचेष्टा लक्षणं ॥ पश्य ॥ लीलाचंक्रमणे र्विपंकशिखरश्रेणीषु लोलंचरन्नासीनः क्वचिदूर्ध्वजानुकल
यन्नल्लेपः समुज्जृंभणं ॥ क्रीडाकारिविचेष्टितैर्विनिमयदूर्वाणि वामभ्युपैं पौराणां पुरतश्चरन्प्रहसनं प्रस्तौति शाखा
मृग इति ॥ अवलमभिनीय ॥ अयमिहानीं ॥ नाडीभेदविभिन्नकालकलना विज्ञानसंसिध्यये दैवज्ञाभिहतारमंद
घटिकाघंटामणेरुत्थितः ॥ लोकानां श्रवणोत्सवं विरचयन्रंध्रक्रमात्तेध सौधाग्रीयान्निनदः क्वचित्समुकुलन्याया
समुज्जृंभते ॥ तदयं मध्यान्हसमयो वर्तते ॥ उर्ध्वमवलोक्य ॥ सखे पश्य पातानुद्गततरपर्वतमस्तकेषु ॥ विन्यस्य सांद्र

१६

चिरयसहस्रभानुः ॥ अन्वेषमं धत्तमसंगहनेषु लीनमारोहतीति गगनाग्रमयं प्रतीमः ॥ किं च ॥ मम तु पुनरेवं प्रतिभाति ॥ कांता
रलीनमिव संतमनं विचेतुमाकाशपादपशिखामधिरूढ्य भानुः ॥ अन्वेष्य यं पतनभीत इवारविंदाशाशाखावलिंनि जकरैर्युगपद्वि
र्ति ॥ इति सर्वतोवलोक्य ॥ अहो स्थावराणामपि शरणागतपरित्राणपरायणता ॥ पश्य ॥ अंगुल्या दिनकरमंडलं निर्दिश्य ॥ रोषादेव
करान्प्रसार्य कुरुते संत्राहमन्हां पतिश्छायां नाशयितुं निजातपभरत्राणे घतामद्यतां ॥ एते भूमिरुहस्तु पल्लवकरैः संरुध्य भा
स्वत्करान्गोपायंति ॥ किं च ॥ नको नु वा परपरित्राणोद्यतं त्रायते ॥ परं तु छायापरिपालनं नपादपानां प्रशंसापदं ॥ ये पालयं
ति निरुपाधिप्रणादिभिः स्वैः फलैः जनान्कुतोपि विषपाकचनमयातान् ॥ स्वाकारमेव दधती स्वशरीरजातां छायां न पांतितरवः
कथमातपानेइति ॥ अन्यतो दृष्ट्वा ॥ कमलोदरमकरंदमपरिदुर्णा विहायसानंदं ॥ मदशिशिरितशरपालीभिभक्तलभा
नामुपैति मधुपाली ॥ कतिचित्पदानि गत्वा ॥ इयमिह ॥ सिक्तं स्वेदपयोभिः सकरजव्रणेषु चंदनेषु ॥ सीदन्ति संकुचिदधरं
केचुकमबलाशनैरुदंचयति ॥ किं च ॥ एवमेव तत्त ॥ उच्चैरुन्नमनान्मुजालतिकयोरुन्मिलितो पार्श्वयोराकर्णनार्ईनखव्रणांक
वलयावादर्शयंतीकुचौ ॥ बिभ्राणा गुरुकांचलेन निखचयं बिंबाधरापाटले कांता मुंचति निःसहानपपरिक्लांता श
नैः कंचुकीं ॥ पुनर्विलोक्य ॥ कथमग्रत एव समुदग्रकनकदंडकलिना पांडुरातपत्रपुंडरीकमंडलच्छायांतरितघना
तपाकाकमलमुखी सखी करमवलंब्य सलिलमभिमुखी भवति ॥ निर्वर्ण्य ॥ हारं हारं मुखपरिमलं मोहन दृशोरुच्चां
नेतानेताकमलममलं बांधवमपि ॥ सुषाच्चत्रच्छन्ना तिरयति रविं शीतकिरणो दुरालोकं लोके रिपुविभवमारको कथ्य
ति कः ॥ समत्यभिहं कथमियमस्मदपदतकौमारा नातिचिरादेव समग्रयौवनावतारा तारा ॥ यतः उभे दंप्रतिपद्यपक्षबद

रीभावं समेष्यत्क्रमात्सुन्नागा इति माधवपूगपदवीमारुह्य विस्वाश्रियं ॥ लब्ध्वा तालफलोपमं च ललितां मासाद्य भ्रूयो धुनाखं च
त्कांचनकुंभजृंभणामिमा वस्याः स्तनौ बिभ्रतः ॥ आलिंग्य ॥ आत्मगतं ॥ अलं कौतुकं तु यदपहृतमध्यंगमभवन्मुजेनैकेना
पि प्रथमपरिरंभे मम हृदः ॥ तदेवाद्य प्रेम्णागतमपि मदंगैकरसतां न ॥ माति प्रोत्तुंगस्तनभरतया बालयुगलं ॥ प्रकाशं
अपि नाम यदा कदा वा स्मरसि भुजंगशेखरं ॥ सोपालंभं ॥ किं-षि ॥ किमिति स्मरामि कितवाचारं भवंतं ॥ मायाविन्यति
कर्कशात्मनिदया दूरे मया भाषणे मिथ्या बाह्यविडंबनं कृतं तु रेखी कृष्णा क्षि मे त्वयि ॥ आस्ते कोपि वियोगभक्षी हृरनिर्श
कृष्णो मम अंतर्बहिर्यि पश्यामिव सल्लपामिव मुहुः श्लिष्यामि हृष्यामि च ॥ इति सहर्षं आत्मगतं ॥ कथं वारयुवतीजा
तेरपि प्रेमबंधुरं हृदयं ॥ सखि जानामि ते सहजानुरागरमणीयं चेतः ॥ भवतु केयं पार्श्ववर्तिनी ॥ यस्याः ॥ किंचित्किं
चिदुदंचती नवलया द्वारेण वक्षस्थली मंदं मंदं दृश्विवाधिरोहति वचो लीलाक्रमे वक्रिमा ॥ स्तोकं स्तोकमिवाविरस्ति
सरसभ्रूताविलासो दृशोवरिं वारमवेक्ष्य ते च मदनो वस्तुं वरांग्या वपुः ॥ किंच ॥ पदमधरदले विधाय रागः प्रविशति
संप्रति मानसं मृगाक्ष्याः ॥ घनति कुटिलतापि कुंतलेभ्यो विपुलविलोचनलोलवीचिकासु ॥ किं-षि ॥ भाव इयं ममे
व कनीयसी शशिरेखा इति ॥ सप्रसभिस्ताश्चर्यं ॥ कथमेतावंतं च अनेहसं तावदियमीदृशामारूढा संपदं अधिगता
ममाद्य विस्मितमालोकयतः ॥ अव्यक्तवर्णमपि कर्णरसायनं यस्या यस्खलल्सहमपि प्रियदर्शनं यत् ॥ आभापलं जगमनं च तत्
देवसाक्षाद द्यापि मे भवति शैशवचन्नमस्य ॥ तदस्या अपि कौमारं अहमेव अपरिष्यामि ॥ मयूरकः ॥ किं-षि ॥ विद
ग्धः खलु भवान् ॥ मुग्धांगनाजनमनोरंजनकलास्विति ॥ यथैव मांगीकुरोति प्रेयसी ताराता हि सफलं मेवेद

ग्धं सखि ॥ किं-षि ॥ मदनुभुक्तशेषं किल तयाप्यनुभोक्तव्यं गच्छ रक्तगौरतापेनुपादनस्वं पचे पथि किं स्थालापेने
ति ॥ तर्हि गच्छ ॥ वयमप्युद्यानवाटीं प्रविश्यातपं नेष्यामः ॥ सखे पुरोद्यानपद्यां दर्शय ॥ किं-षि ॥ इत इतः ॥ इति परिक्रम्य
विलोक्य ॥ सकौतुकं ॥ कथमत्रैव सरस्यां माध्याह्निकस्नानमाचरंति महीसुराः ॥ विहस्य ॥ किं-षि ॥ अनवरतजडाशयप
रिचयादेव नूनमेषां श्रोत्रियजडानां प्रतिदिनमतिशेते मतिजाड्यं ॥ किंच सितासितसस्मितमुख महांतर्धराशेरपि महत्त
रमिदं मरकतनामकं सरः ॥ पारलौकिकसुसुखसाधनमिति पौराणिकगाथामनुधावतामवनीसुराणाम् महारणी
यमंभोवगाहनं व्रतमिति ॥ ननु रहस्यविहारमत्रैव सुखमस्ति ॥ यतः ॥ दरहासविलोकनाप्रदेशा स्मिलिते यत्र सि
तासितेतरिन्ये ॥ सुदृशां पुरतो विगाह्य तस्मिन् सुखमत्रैव भजंति केपि धन्याः ॥ अन्यच्च ॥ भंगोत्पलांबुरुहकंबुमृणा
लकोकशैवालवीचिसलिलभ्रमसैकतानि ॥ यत्रैभहस्तकमलस्फुरितानि भांति क्रीडंति तत्र रसिकाः सरसं सरस्यां ॥
किं-षि ॥ सखे हीयतामितो दृष्टिः ॥ अंबुसिक्तनिविमलांबरांतराद्दिंबमानजघनोरुमंडलाः ॥ उत्तरंति सरसो घ्रजालि
काख्रितमोहकरसिध्रमृत्तिकाः ॥ इति ॥ दृष्ट्वा स्मरणमभिनीय ॥ वयस्य ॥ विमलसलिलासिक्तां सक्तांबरप्रतिबिं
